# SANSKRIT

Name & Signature of the Invigilator

**PAPER-III**
**SEPT/13/07**

ICR Answer Sheet No. : 

Roll No. : 

Roll Number in words : 

**Time : 2.30 Minutes]** **No. of Printed Pages : 16** **[Maximum Marks : 150**

**Instructions for the Candidates**

1. Write your Roll Number in the space provided on the top of this page.
2. This paper consists of Seventy five (75) multiple choice type questions. All questions are compulsory.
3. At the commencement of examination, the question booklet will be given to candidate. In the first 5 minutes, candidate is requested to open the booklet and compulsorily examine it as below :
   (*i*) To have access to the question booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal and do not accept an open booklet.
   (*ii*) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of five minutes. Afterwards, neither the question booklet will be replaced nor any extra time will be given.
   (*iii*) After this verification is over, the test booklet number should be entered in the ICR answer sheet and the ICR Answer Sheet number should be entered on this test booklet.
4. Each item has upto four alternative responses marked (A), (B), (C) and (D). The answer should be a capital letter for the selected option. The answer letter should entirely be contained within the corresponding square.

   Correct method **A** Wrong method **A** OR **A**
5. Your responses to the items for this paper are to be indicated on the ICR Answer Sheet under Paper III only.
6. Read instructions given inside carefully.
7. Rough work is to be done in the end of the booklet only.
8. You have to return the original ICR Answer Sheet to the invigilators at the end of the examination compulsorily and must not carry it with you outside the examination hall. You are, however, allowed to carry duplicate copy of ICR sheet and test booklet on conclusion of the examination.
9. Use black ball point pen.
10. Use of any Calculators or log tables or any other electronic devices is prohibited.
11. There shall be no negative marking.
12. In case of any discrepancy in Gujarati and English version of questions the English version should be taken as final.

**પરીક્ષાર્થીઓ માટે સૂચનાઓ :**

1. આ પાનાની ટોચમાં દર્શાવેલી જગ્યામાં તમારો રોલનંબર લખો.
2. આ પ્રશ્નપત્રમાં બહુવૈકલ્પિક ઉત્તરો ધરાવતા કુલ પંચોતેર (૭૫) પ્રશ્નો આપેલા છે. બધા જ પ્રશ્નો ફરજિયાત છે.
3. પરીક્ષાની શરૂઆતમાં ઉમેદવારને પ્રશ્નપુસ્તિકા આપવામાં આવશે. પ્રથમ ૫ મિનિટ દરમ્યાન, ઉમેદવારે પ્રશ્નપુસ્તિકા ખોલી અને ફરજિયાતપણે નીચે મુજબ પરીક્ષણ કરવું.
   (*i*) પ્રશ્નપુસ્તિકાનો વપરાશ કરવા માટે આ કવર પેજની ધાર પર આપેલ સીલ કાઢી નાખો. કોઈપણ સંજોગોમાં સીલ સ્ટીકર વગરની કે ખુલ્લી પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં.
   (*ii*) કવર પૃષ્ઠ પર છપાયેલ નિર્દેશાનુસાર પ્રશ્નપુસ્તિકાના પ્રશ્નો પૃષ્ઠો અને સંખ્યાને બરાબર ચકાસી લો. ખામીયુક્ત પ્રશ્નપુસ્તિકા કે જેમાં પૃષ્ઠો/પ્રશ્નો ઓછા હોય, બે વાર છપાયા હોય, અનુક્રમમાં અથવા કોઈ અન્ય ફરક હોય અર્થાત કોઈપણ કારણે ખામીયુક્ત પ્રશ્નપુસ્તિકા સ્વીકારવી નહીં. અને જો ખામીયુક્ત પ્રશ્નપુસ્તિકા મળી હોય તો નિરીક્ષક પાસેથી તુરંત જ બીજી સારી પ્રશ્નપુસ્તિકા મેળવી લેવી. આ માટે ઉમેદવારને પાંચ મિનિટનો સમયગાળો આપવામાં આવશે. પછીથી, પ્રશ્નપુસ્તિકા બદલવામાં આવશે નહીં કે કોઈ વધારાનો સમય પણ આપવામાં આવશે નહીં.
   (*iii*) આ ચકાસણી સમાપ્ત થાયપછી, ટેસ્ટ પુસ્તિકા નંબર ICR જવાબ પત્રકમાં લખવો અને ICR જવાબ પત્રક નંબર પ્રશ્નપુસ્તિકા પર લખવો.
4. પ્રત્યેક પ્રશ્ન માટે ચાર ઉત્તર વિકલ્પ (A), (B), (C) અને (D) આપવામાં આવેલ છે. પસંદગીનો જવાબ માત્ર અંગ્રેજી કેપીટલ મૂળાક્ષર દ્વારા જ આપવો. પસંદ કરેલ અંગ્રેજી કેપીટલ અક્ષર આપેલ ખાનામાં સંપૂર્ણ રીતે સમાઈ જાય તે રીતે લખવો.

   સાચી રીત : **A** ખોટી રીત : **A** અથવા **A**
5. આ પ્રશ્નપુસ્તિકાના પ્રશ્નોના જવાબ અલગથી આપવામાં આવેલ ICR જવાબ પત્રકમાં પેપર–૩ લખેલ વિભાગમાં જ લખવા.
6. અંદર આપેલ સૂચનાઓ ધ્યાનપૂર્વક વાંચો.
7. આ પ્રશ્નપુસ્તિકાની અંતે આપેલ પાનું રફ કામ માટે છે.
8. પરીક્ષા સમય પૂરો થઈ ગયા પછી ઓરીજીનલ ICR જવાબ પત્રક જે તે નિરીક્ષકને ફરજીયાત સોંપી દેવું અને કોઈપણ સંજોગોમાં પરીક્ષાખંડની બહાર જઈ શકશે નહીં. પરીક્ષા પૂર્ણ થયા બાદ ઉમેદવાર પ્રશ્નપુસ્તિકા તથા ICR જવાબવહીની ડુપ્લિકેટ કોપી પોતાની સાથે લઈ જઈ શકે છે.
9. માત્ર કાળી પેન/કાળી બોલ પેન વાપરવી.
10. કેલ્ક્યુલેટર અને અન્ય ઈલેક્ટ્રોનિક યંત્રોનો ઉપયોગ કરવાની મનાઈ છે.
11. ખોટા જવાબ માટે નેગેટિવ ગુણાંકન પ્રથા નથી.
12. પ્રશ્નપુસ્તિકાના કોઈ પ્રશ્નમાં અનુવાદ અંગે કોઈ વિવાદ/મતભેદ જણાય તો અંગ્રેજી વર્ઝન યોગ્ય ગણાશે.

# SANSKRIT

## PAPER-III

**सूचना :** अस्मिन् प्रश्नपत्रे **पञ्चसप्तति** संख्याकाः बहुविकल्पाः प्रश्नाः सन्ति । प्रत्येकस्य प्रश्नस्य कृते अङ्कद्वयं निर्धारितम् । **सर्वे** प्रश्नाः समाधेयाः ।

---

1. 'कस्मै देवाय हविषा विधेम' इति वर्णनं कस्मिन्सूक्ते वर्तते ?

   (A) पुरुषसूक्ते (B) नासदीयसूक्ते

   (C) हिरण्यगर्भसूक्ते (D) इन्द्रसूक्ते

2. शिवसंकल्पसूक्ते कस्य वर्णनं विशेषेण वर्तते ?

   (A) यज्ञस्य (B) मनसः

   (C) राष्ट्रस्य (D) ईश्वरस्य

3. 'ब्राह्मणोऽस्य मुखमासीत्' इत्यस्य मन्त्रांशस्य क ऋषिर्वर्तते ?

   (A) वसिष्ठः (B) नारायणः

   (C) विश्वामित्रः (D) प्रगाथः

4. 'कामस्तदग्रे समवर्तताधि' मन्त्रभागोऽयं कस्मिन् सूक्ते वर्तते ?

   (A) पुरुषसूक्ते (B) हिरण्यगर्भसूक्ते

   (C) नासदीयसूक्ते (D) इन्द्रसूक्ते

5. शुनःशेपाख्यानं कस्मिन् ब्राह्मणे विद्यते ?

   (A) शतपथब्राह्मणे (B) तैत्तिरीयब्राह्मणे

   (C) ऐतरेयब्राह्मणे (D) गोपथब्राह्मणे

6. पञ्चमहायज्ञेषु परिगणितो यज्ञो न वर्तते ?

(A) बलिवैश्वदेव:
(B) दर्शपूर्णमास:
(C) देवयज्ञ:
(D) ब्रह्मयज्ञ:

7. अनुदात्तस्य कृते चिह्नं कथं वर्तते ?

(A) +
(B) –
(C) ÷
(D) |

8. कस्मिन् लकारे प्रथमाक्षरस्य उदात्त: स्वरो वर्तते ?

(A) लट्-लकारे
(B) लिङ्-लकारे
(C) लेट्-लकारे
(D) लङ्-लकारे

9. 'तेन त्यक्तेन भुञ्जीथा:' इत्युपदेश: कस्या उपनिषदो वर्तते ?

(A) केनोपनिषद्
(B) ईशावास्योपनिषद्
(C) कठोपनिषद्
(D) बृहदारण्यकोपनिषद्

10. नाचिकेतस उपाख्यानं कस्यामुपनिषदि विवर्ण्यते ?

(A) कठोपनिषदि
(B) केनोपनिषदि
(C) छान्दोग्योपनिषदि
(D) श्वेताश्वतरोपनिषदि

11. मैत्रेयी-याज्ञवल्क्यसंवाद: कस्यामुपनिषदि विद्यते ?

(A) ईशोपनिषद्
(B) बृहदारण्यकोपनिषद्
(C) केनोपनिषद्
(D) कठोपनिषद्

12. 'रसो वै स:' इति वचनं कस्यामुपनिषदि प्राप्यते ?

(A) प्रश्नोपनिषद् (B) बृहदारण्यकोपनिषद्

(C) माण्डूक्योपनिषद् (D) तैत्तिरीयोपनिषद्

13. 'शिक्षावल्ली' इति विभाग: कस्यामुपनिषदि वर्तते ?

(A) केनोपनिषदि (B) ईशोपनिषदि

(C) तैत्तिरीयोपनिषदि (D) बृहदारण्यकोपनिषदि

14. 'अयमात्मा ब्रह्म' इति महावाक्यं कस्या उपनिषदो विद्यते ?

(A) बृहदारण्यकोपनिषद: (B) तैत्तिरीयोपनिषद:

(C) कठोपनिषद: (D) ईशावास्योपनिषद:

15. 'आत्मा वा अरे द्रष्टव्य:' इति वाक्यं कस्यामुपनिषदि वर्तते ?

(A) बृहदारण्यकोपनिषदि (B) प्रश्नोपनिषदि

(C) श्वेताश्वतरोपनिषदि (D) केनोपनिषदि

16. उपनिषत्सु का विद्या विशेषेण वर्ण्यते ?

(A) ब्रह्मविद्या (B) यज्ञविद्या

(C) अग्निविद्या (D) कर्मविद्या

17. श्रोत्ररूपेण प्रतिष्ठितं वेदाङ्गं किम् ?

(A) व्याकरणम् (B) कल्प:

(C) निरुक्तम् (D) ज्योतिषम्

18. यास्कमतेन आख्यातस्य लक्षणं किमस्ति ?

(A) सत्त्वप्रधानम् (B) भावप्रधानम्

(C) उपसर्गप्रधानम् (D) प्रत्ययप्रधानम्

19. यास्कमतेन पदानां कति विभागाः विद्यन्ते ?

(A) तिस्रः (B) चत्वारः

(C) पञ्च (D) सप्त

20. यास्कमतेन अग्नेर्निवासस्थानमस्ति ।

(A) पृथिवीलोके (B) अन्तरिक्षलोके

(C) द्युलोके (D) ब्रह्मलोके

21. निरुक्तानुसारमयं भावविकारान्तर्गतो नाम्ना नास्ति ।

(A) जायते (B) विपरिणमते

(C) वर्धते (D) विवर्तते

22. यास्कदृष्ट्या देवतानां कतिविधानि स्थानानि सन्ति ?

(A) पञ्च (B) सप्त

(C) त्रीणि (D) अष्ट

23. 'यद् दूरं गता भवति, यच्चास्यां भूतानि गच्छन्ति – इयं कस्या व्युत्पत्तिर्वर्तते ?

(A) गौशब्दस्य (B) वृत्रशब्दस्य

(C) उदकशब्दस्य (D) ह्रदशब्दस्य

24. 'उच्छति-इति रात्रेरपरः कालः' इति व्युत्पत्तिः कस्य शब्दस्य विद्यते ?

(A) आदित्य- (B) उदक-

(C) उषा- (D) वाक्-

25. महाभाष्ये कति आह्निकानि सन्ति ?

(A) पञ्चाशीतिः (B) अष्टाशीतिः

(C) नवतिः (D) नवाशीतिः

26. 'रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' कस्येयमुक्तिः ।

(A) पाणिनेः (B) कात्यायनस्य

(C) भर्तृहरेः (D) पतञ्जलेः

27. 'कृत्तद्धितसमासाश्च' इति सूत्रेण का संज्ञा विधीयते ?

(A) प्रातिपदिकसंज्ञा (B) नदीसंज्ञा

(C) घिसंज्ञा (D) लघुसंज्ञा

28. 'भू'धातोः आशीर्लिङ्लकारे प्रथमपुरुषैकवचने किं रूपम् ?

(A) भविता (B) भूयात्

(C) भवेत् (D) भवति

29. जुगुप्साविरामादीनामर्थे का विभक्तिर्भवति ?

(A) तृतीया (B) चतुर्थी

(C) पञ्चमी (D) सप्तमी

30. 'नारी' इत्यत्र कः प्रत्ययः ?

(A) ङीप्
(B) ङीष्
(C) टाप्
(D) ङीन्

31. भर्तृहरेर्वाक्यपदीयस्य प्रथमकाण्डस्य किं नाम ?

(A) वाक्यकाण्डम्
(B) ब्रह्मकाण्डम्
(C) पदकाण्डम्
(D) बालकाण्डम्

32. स्फोटस्य कति भेदाः सन्ति ?

(A) पञ्च
(B) सप्त
(C) नव
(D) अष्टौ

33. भारत-यूरोपीय-परिवारः कस्मिन् वर्गेऽन्तर्भवति ?

(A) आकृतिमूलके
(B) परिवारमूलके
(C) योगात्मके
(D) अयोगात्मके

34. भाषाविज्ञानदृष्ट्या अर्थपरिवर्तनान्तर्गतो को नास्ति ?

(A) अर्थविस्तारः
(B) अर्थसंकोचः
(C) अर्थ-आदेशः
(D) अर्थ-आगमः

35. मूलप्रकृतिः कीदृशी वर्तते ?

(A) प्रकृतिः
(B) अविकृतिः
(C) विकृतिः
(D) अतिविकृतिः

36. सांख्यानां कार्यकारणवादः कीदृशः ?

(A) सत्कार्यवादः

(B) असत्कार्यवादः

(C) विज्ञानवादः

(D) मोक्षवादः

37. योगसूत्रानुसारेण कतिविधा वृत्तयो भवन्ति ?

(A) पञ्चतय्यः

(B) सप्त

(C) अष्ट

(D) नव

38. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः कः ?

(A) देवः

(B) ईश्वरः

(C) कालः

(D) इन्द्रः

39. अनुबन्धः कतिविधः ?

(A) चतुर्विधः

(B) षड्विधः

(C) अष्टविधः

(D) दशविधः

40. षट्कसंपत्तिमध्ये कस्य गणना न भवति ?

(A) शमस्य

(B) दमस्य

(C) उपरतेः

(D) मुमुक्षुत्वस्य

41. ब्रह्मसूत्रशांकरभाष्यस्य अपरं नाम किम् ?

(A) शारीरकभाष्यम्

(B) भामतीभाष्यम्

(C) गौडपादभाष्यम्

(D) दीपिकाभाष्यम्

42. बौद्धदर्शनस्य कियन्तो भेदाः सन्ति ?

(A) त्रयः (B) पञ्च

(C) चत्वारः (D) सप्त

43. भङ्गीन्यायो जैनमतेन कतिविधः ?

(A) पञ्चविधः (B) सप्तविधः

(C) अष्टविधः (D) नवविधः

44. इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं किम् ?

(A) प्रत्यक्षं (B) उपमानं

(C) शाब्दं (D) अनुमानं

45. 'शोकः श्लोकत्वमागतः' इति कस्मिन्काण्डे वर्णितम् ?

(A) युद्धकाण्डे (B) बालकाण्डे

(C) अरण्यकाण्डे (D) सुन्दरकाण्डे

46. रामायणस्य समीक्षितावृत्तिः कया संस्थया प्रकाशिता ?

(A) प्राच्यविद्यामंदिरम्, वडोदरा (B) निर्णयसागरसंस्था, मुंबई

(C) भाण्डारकर-संशोधन-संस्था, पुणे (D) गीताप्रेस, गोरखपुर संस्था

47. सुन्दरकाण्डस्य क्रमसंख्या का वर्तते ?

(A) द्वितीया (B) तृतीया

(C) चतुर्थी (D) पञ्चमी

48. महाभारतसंहितायाः प्रथमं नाम किं वर्तते ?

(A) विजयसंहिता (B) जयसंहिता

(C) पराजयसंहिता (D) शौनकसंहिता

49. श्रीमद्भगवद्गीता महाभारतस्य कस्य पर्वभागो विद्यते ?

(A) शल्यपर्वणः (B) शान्तिपर्वणः

(C) भीष्मपर्वणः (D) द्रोणपर्वणः

50. द्यूतक्रीडावर्णनं कस्मिन् पर्वणि वर्तते ?

(A) सभापर्वणि (B) कर्णपर्वणि

(C) आदिपर्वणि (D) स्त्रीपर्वणि

51. पुराणानुसारेण मन्वन्तराणि कति संख्यकानि ?

(A) द्वादश (B) चतुर्दश

(C) षोडश (D) अष्टादश

52. महाभारतस्य खिलपर्व किं विद्यते ?

(A) विष्णुपुराणम् (B) नारदपुराणम्

(C) भागवतपुराणम् (D) हरिवंशम्

53. कौटलीयार्थशास्त्रे 'अर्थ'शब्दस्य कोऽर्थः ?

(A) धनम् (B) धान्यम्

(C) हिरण्यम् (D) मनुष्यवती भूमिः

54. अर्थशास्त्रानुसारेण वार्ताशब्दस्यार्थः कः ?

(A) इतिवृत्तं (B) संवादः

(C) कृषिः, पशुपालनं, वाणिज्यं (D) आन्वीक्षिकी

55. मनुस्मृत्यनुसारेण परमो धर्मः कः ?

(A) दया (B) परोपकारः

(C) आचारः (D) निष्कामकर्म

56. ब्राह्मणो मनुस्मृत्यनुसारं केन सिद्धिं प्राप्नोति ?

(A) जप्येन (B) अध्ययनेन

(C) अध्यापनेन (D) देवपूजनेन

57. याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति ?

(A) त्रयः (B) चत्वारः

(C) पञ्च (D) सप्त

58. मनुस्मृतेः सप्तमाध्यायस्य प्रधानविषयः कः ?

(A) ब्रह्मविद्या (B) संस्काराः

(C) कृषिः (D) राजधर्मः

59. याज्ञवल्क्यस्मृत्यनुसारेण मानुषं प्रमाणं कतिविधम् ?

(A) चतुर्विधम् (B) द्विविधम्

(C) त्रिविधम् (D) सप्तविधम्

60. 'उद्बाहुरिव वामनः' इत्युपमा कस्मिन्महाकाव्ये वर्तते ?

(A) नैषधचरिते
(B) किरातार्जुनीये
(C) रघुवंशे
(D) कुमारसंभवे

61. 'अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः' इति वाक्यं कस्मिन् महाकाव्येऽस्ति ?

(A) रघुवंशे
(B) शिशुपालवधे
(C) किरातार्जुनीये
(D) नैषधीयचरिते

62. शिशुपालवधे शिशुपालः कीदृशं पात्रम् ?

(A) नायकः
(B) प्रतिनायकः
(C) न कोऽपि
(D) सहनायकः

63. 'अधीतिबोधाचरणप्रचारणैः' इति वाक्यं कस्मिन्महाकाव्ये वर्तते ?

(A) सौन्दरानन्दे
(B) शिशुपालवधे
(C) बुद्धचरिते
(D) नैषधचरिते

64. कादम्बरी कीदृशः साहित्यप्रकारो वर्तते ?

(A) कथा
(B) आख्यायिका
(C) चम्पू
(D) रूपकम्

65. 'काव्यस्यायमलंकारः कोऽप्यपूर्वो विधीयते' इति कस्योक्तिरस्ति ?

(A) मम्मटस्य
(B) जगन्नाथस्य
(C) कुन्तकस्य
(D) राजशेखरस्य

66. 'विभाति लावण्यमिवाङ्गनासु' इति कस्योक्तिर्वर्तते ?

(A) विश्वनाथस्य (B) भरतस्य

(C) मम्मटस्य (D) आनन्दवर्धनस्य

67. 'वापीं स्नातुमितो गतासि ...............' इति पद्यं कीदृशस्य काव्यस्योदाहरणम् ?

(A) उत्तमस्य (B) अधमस्य

(C) मध्यमस्य (D) न कस्यापि

68. 'लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति' इति कस्मिन्नाटके वर्ण्यते ?

(A) अभिज्ञानशाकुन्तले (B) उत्तररामचरिते

(C) कर्णभारे (D) मुद्राराक्षसे

69. 'हुतं च दत्तं च तथैव तिष्ठति' इति वचनं कस्मिन्नाटके वर्तते ?

(A) कर्णभारे (B) ऊरुभङ्गे

(C) दूतवाक्ये (D) मध्यमव्यायोगे

70. रत्नावल्यां कस्या नगर्या दृश्यं वर्तते ?

(A) कौशाम्ब्याः (B) उज्जयिन्याः

(C) श्रीलङ्कायाः (D) श्रावस्त्याः

71. 'हाथीगुम्फा' कस्य अभिलेखोऽस्ति ?

(A) कान्धारस्य (B) मन्दसौरस्य

(C) खारवेलस्य (D) तोरमाणस्य

72. नालन्दाशिलालेखोऽस्ति कस्य कालीनः ?

(A) विष्णुवर्धनस्य (B) यशोधर्मणः

(C) ईशानवर्मणः (D) यशोवर्मदेवस्य

73. अशोककालीनशिलालेखेषु का लिपिः ?

(A) देवनागरी (B) गुरुमुखी

(C) अरबी (D) ब्राह्मी

74. मिहिरकुलस्याभिलेखस्य नाम किं वर्तते ?

(A) एरण-अभिलेखः (B) ग्वालियर-अभिलेखः

(C) बोधगया-अभिलेखः (D) हड्डा-अभिलेखः

75. अभिलेखानां सर्वाधिकं महत्त्वं किमस्ति ?

(A) दार्शनिकम् (B) धार्मिकम्

(C) ऐतिहासिकम् (D) वैज्ञानिकम्

## ROUGH WORK

SEAL